শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী পার্থসারথিদাসেন কৃতং

# ॥ শ্রী পদ্মাৱতীস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী পদ্মাৱতীস্তোত্রম্ ॥

ৱিষ্ণুপত্নি জগন্মাতঃ ৱিষ্ণুৱক্ষঃ স্থলস্থিতে।
পদ্মাসনে পদ্মহস্তে পদ্মাৱতি নমোঽস্তু তে॥ **1** ॥

ৱেঙ্কটেশপ্রিযে পূজ্যে ক্ষীরাব্ধিতনযে শুভে।
পদ্মে রমে লোকমাতঃ পদ্মাৱতি নমোঽস্তু তে॥ **2** ॥

কল্যাণি কমলে কান্তে কল্যাণপুরনাযিকে।
কারুণ্যকল্পলতিকে পদ্মাৱতি নমোঽস্তু তে॥ **3** ॥

সহস্রদলপদ্মস্থে কোটিচন্দ্রনিভাননে।
পদ্মপত্রৱিশালাক্ষি পদ্মাৱতি নমোঽস্তু তে॥ **4** ॥

সর্ৱজ্ঞে সর্ৱৱরদে সর্ৱমঙ্গলদাযিনি।
সর্ৱসম্মানিতে দেৱি পদ্মাৱতি নমোঽস্তু তে॥ **5** ॥

সর্ৱহৃদ্দহরাৱাসে সর্ৱপাপভযাপহে।
অষ্টৈশ্ৱর্যপ্রদে লক্ষ্মি পদ্মাৱতি নমোঽস্তু তে॥ **6** ॥

দেহি মে মোক্ষসাম্রাজ্যং দেহি ৎৱৎপাদদর্শনম্।
অষ্টৈশ্ৱর্যং চ মে দেহি পদ্মাৱতি নমোঽস্তু তে॥ **7** ॥

নক্রশ্রৱণনক্ষত্রে কৃতোদ্বাহমহোৎসৱে।
কৃপযা পাহি নঃ পদ্মে ৎৱদ্ভক্তিভরিতান্ রমে॥ **8** ॥

ইন্দিরে হেমৱর্ণাভে ৎৱাং ৱন্দে পরমাত্মিকাম্।
ভৱসাগরমগ্নং মাং রক্ষ রক্ষ মহেশ্ৱরি॥ **9** ॥

কল্যাণপুরৱাসিন্যৈ নারাযণ্যৈ শ্রিযৈ নমঃ।
শ্রুতিস্তুতি প্রগীতাযৈ দেৱদেৱ্যৈ চ মঙ্গলম্॥ **10**॥

॥ শ্রী পদ্মাৱতীস্তোত্রং সমাপ্তম্॥